अप्। १हिमालयस्थे देशभेदे। "ततो हिमवतः पार्श्वं समभ्येत्य जलोद्भवम्। सर्वमल्पेन कालेन देशं चक्रे वशं बली" भा० स० २९अ०। २जलजाते त्रि० "गण्डकीन्तु समासाद्य सर्वतीर्थजलोद्भवाम्" भा०व० ८४अ०। ३लघुब्राह्म्याम् राजनि०।

**जलोद्भूत** त्रि०जले उद्भूतः।१जलभवे २क्षुपभेदे स्त्री राजनि०

**जलोरगा** स्त्री जले उरगीव दीर्घत्वात् विषवत्त्वाच्च पृषो०। जलोकायां सारसुन्दरी।

**जलौकस्** स्त्री ब०व० जलमोको वसतिरासाम्। (जोंक) ख्यातायां रक्तपायाम् अमरः। अस्य बहुवचनत्वं प्रायिकम्। "जलोरगा जलौका तु जलोका च जलौकसीति" संसारावर्त्तोक्तेः। "अभिच्छितो जलौकसः" इति सुश्रुतोक्तेश्च।२जलस्थानके जन्तुमात्रे त्रि० "जलौकसां स सत्वानां बभूव प्रियदर्शनः" भा० अनु० ५०अ०।

**जलौकस** पुंस्त्री जलमोकः स्थानमस्त्यस्याः—अच्। जलौकायां रायमुकुटः।

**जल्प** वाग्विशेषे उक्तौ च भ्वा०पर०सक०सेट्। जल्पति अजल्पीत्। जजल्प तत्र कथाभेदे"मयि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव" इति अनुमानशिरोमणिः। कथामात्रे "अनागमः प्रजानाञ्च प्रमादादिव जल्पतः" भा०स०२१अ० "हसते जल्पते वैरी एकपात्रे च भुञ्जते" हरिवं०२०अ० अत्र आर्षत्वात् पदव्यत्ययः, भुञ्जते इत्यत्र गणव्यत्ययश्च।

अनु+कथनोत्तरकथने पश्चात् कथने तुल्यरूपकथने च "जल्पन्त्यामनुजल्पति" भाग० ४।२५।५८। [ आर० १अ०।

अभि+आभिमुख्येन कथने "अन्योन्यमभिजल्पन्तः" रामा०

प्रति+प्रत्युत्तरकथने प्रतिरूपकथने च। "न चैवोक्ता नवाऽनुक्ता हीनतः परुषा गिरः। भारत! प्रतिजल्पन्ति सदा तूत्तमपूरुषाः" भा० स० ७०अ०।

वि+अति+अन्योन्यकथने शब्दकर्म्मकत्वात् व्यतिहारे न तङ्। व्यतिजल्पति" सि० कौ०।

**जल्प** पु० जल्प—भावे घञ्। १कथने। "इति प्रियां वल्गुविचित्रजल्पैः" भाग० १।७।१८। आर्षेऽस्य क्लीवतापि। "तूष्णींभव न ते जल्पमिदं कार्य्यं कथञ्चन" भा० आ० १२९अ० "कैकेयीं संश्रितं जल्पं नेदानीं प्रतिभाति मे" रामा०अयो०६०अ०। उभयत्र जल्पमिति पाठस्तु सम्यक्। परमतनिराकरणपूर्वकस्वमतस्थापनरूपे विजिगीषोः २कथाभेदे च। तल्लक्षणं गौतमेनोक्तं यथा "यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः" गौत० सू०। व्याख्यातञ्चैतत् विश्वनाथेन।

"यथोक्तेषु यदुपपन्नं तेनोपपन्न इत्यर्थः। मध्यपद०लोपी समासः। तथा च प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रह इत्यस्य योग्यतया परामर्शः अन्यथा जल्पस्य वादविशेषत्वापत्तिः प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्यां न तु ज्ञानेऽनाहार्य्यत्वं विवक्षितम् आरोपितप्रमाणभावेनाभासेऽपि जल्पनिर्वाहात्। यद्यपि छलादिभिरुपालम्भ एव न तु साधनं तथापि साधनस्य परकीयानुमानस्योपालम्भो यत्रेत्यर्थान्न दोषः। परपक्षदूषणे सति स्वपक्षसिद्धिरित्यतः साधने तदुपयोग इत्यन्ये। उभयपक्षस्थापनावत्त्वेन च विशेषणीयमतो वितण्डायामतिव्याप्तिः"स प्रतिपक्षस्थापनाहीनः" इत्युत्तरसूत्रात् प्रकृते उभयपक्षस्थापनावत्त्वादेव च पञ्चावयवनियमोऽपि लभ्यत इति वदन्ति। अत्र च छलादिभिः सर्वैरुपालम्भो न विशेषेण व्याप्तिरपि तु तद्योग्यतयैव, योग्यतावच्छेदकन्तु वादभिन्नकथात्वमेव तत्र चोक्तवादत्वावच्छिन्नभेदस्तस्माद्भेदो वा विशेषणमिति छलेत्यादिना विजिगीषुकथात्वं बोध्यते विजिगीषुर्हि छलादिकं करोति तथाचोभयपक्षस्थापनावती विजिगीषुकथा जल्प इत्यर्थः इत्यपि वदन्ति। अत्र चायं क्रमः वादिना स्वपक्षसाधनं प्रयुज्य नायं हेत्वाभासलक्षणायोगादिति सामान्यतो न्यायसिद्ध इत्यादि विशेषतो वा। प्रतिवादिना स्वस्याज्ञानादिनिरासाय परोक्तस्यानुवादेन लाभे उच्यमानग्राह्याणामप्राप्तकालार्थान्तरनिरर्थकानामलाभे उक्तग्राह्याणां प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासंन्यासहेत्वन्तराविज्ञातार्थविक्षेपमतानुज्ञान्यूनाधिकपुनरुक्तनिरनुयोज्यानुयोगापसिद्धान्तानामलाभे पर्य्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यत्वादेवानुपन्यासार्हतया यथासम्भवहेत्वाभासेन परोक्तं दूषयित्वा स्वपक्ष उपन्यसनीयः। ततो वादिना तृतीयकक्षास्थितेन परोक्तमनूद्य स्वपक्षदूषणमुद्धृत्यानुक्तग्राह्योच्यमानग्राह्यहेत्वाभासातिरिक्तोक्तग्राह्याणामलाभे हेत्वाभासेन यथासम्भवं प्रतिपक्षवादिनः स्थापना दूषणीया। अन्यथा क्रमविपर्य्यासेऽप्राप्तकालं चानवसरे दूषणीयेन च निरनुयोज्यानुयोगः यथा त्यक्ष्यसि चेत् प्रतिज्ञाहानिं विशेषयसि चेद्धेत्वन्तरमित्यादिप्रतिज्ञाहान्यादिवद्धेत्वाभासानामुक्तग्राह्यत्वाविशेषेऽपि अर्थदोषत्वेनाप्रधानत्वाच्चरमसन्धानमिति"। उञ्छादि०अन्तोदात्तता।

**जल्पन** त्रि० जल्प—नन्द्या० ल्यु। १कथके। भावे ल्युट्।